030645

ग्र॰सं॰ २०१०८

॥अथ॥आरतासार भः॥

Indira Gandhi National
Centre for the Arts

आरण्य०
॥१॥

श्रीगणेशायनमः। राम। ओ३म। भूमिमुपस्पृशेद्‌ग्न इळानमइळा
नमऋषिभ्योमंत्रकृद्भ्योमंत्रपतिभ्योनमोवोअस्तुदेवेभ्यः। शिवानःशंत
मा भवसुमृळीकासरस्वतिमातेव्योमसंदृशि। भद्रंकर्णेभिश्शृणुयामदेवाः
१०।स१।यूनंइंद्राग्नीभवतामवोभिः ऋ१ स्तुषेजनंसुव्रतंनव्यसीभिः ऋ१क
योनश्चित्रआभुवत्‌ ऋस्योनापृथिविभवऋ१ उदितःशुक्रियंदधौनमह
मात्मनिदधेअनुमामैत्विंद्रियंमयिश्रीर्मयियशः। सर्वःसप्राणःसबलः। उ
त्तिष्ठाम्यनुमाश्रीः। उत्तिष्ठत्वनुमायंतुदेवताः। अदब्धंचक्षुशिषितंमनः। सू
र्योज्योतिषांश्रेष्ठोदीक्षेमामाहिंसीः। तच्चक्षुर्देवहितंशुक्रमुच्चरत्‌। पश्येम ॥१॥

हरं…

॥ वाङ्मेमनसिप्रतिष्ठितामनोमेवाचिप्रतिष्ठितमाविरावीर्मएधि। वेदस्यमआणीस्थश्रुतंमेमाप्रहासीरनेनाधीतेन। अहोरा
त्रान्संदधाम्यृतंवदिष्यामिसत्यंवदिष्यामि तन्मामवतुतद्वक्तारमवत्ववतुमामवतुवक्तारमवतुवक्तारम्॥१॥
त्वमग्नेव्रतपाअसिदेवआमर्त्येष्वा। त्वंयज्ञेष्वीड्यः। १ रास्वेयत्सोमभूयोभरदेवोनःसविताप्राशनोवसुर्भूरिरिदंद्रपुरुत्सोनिःशंनोनिदानसस्तक्रम॥

मनुरद्दःशतंजीवेमशरदःशतं। आवद्‌स्त्वं ऋ त्वमग्नेव्रतपाअसि ऋ१भ
न्तोअपिवातयमनः। ओंशांतिः शांतिःशांतिः। ओ३म अथमहाव्रतमिंद्रोवैवृ
त्रंहत्वामहानभवद्यन्महानभवत्तन्महाव्रतमभवत्तन्महाव्रतस्यमहाव्रत
त्वंदृएतस्याङ्गआज्यंकुर्यादितिहैकआहुरेकमितित्वेवस्थितंप्रवोदेवायाग्न
यइतिराद्धिकामोविशोविशोवोअतिथिमितिपुष्टिकामःपुष्टिवैविशःपुष्टि
मानभवतीत्यतिथिमितिपदंभवतिनैनकुर्यादित्याहुरीश्वरोतिथिरेवच
रितोस्तदुहस्माहकुर्यादेवयावेभवतियःश्रेष्ठतामश्नुतेसवाअतिथिर्भव
तिनवाअसंतमातिथ्यायाद्रियंतेतस्मादुकाममेवैतत्कुर्यात्स्वयद्येतत्कु

Indira Gandhi National
Centre for the Arts

आरण्य० ॥२॥

यीद्दागन्म वृत्रहं तममिंत्स्येतं तत्त्वं प्रथमं कुर्यादेतद्धा अहरीप्संत: संवत्सरमा
सतेत आगच्छंतिं त एतेनुष्टुप्शीर्षाणीस्त्रयस्त्र्चा भवंति ब्रह्म वै गायत्री वा
गनुष्टुब् ब्रह्मणैव तद्वाचं संदधात्यबोध्यग्नि: समिधा जनानामिति कीर्त्तिका
मो होता जनिष्ट चेतन इति प्रजापशुकाम: ॥१॥ अग्निन्नरो दीधितिभिररण्यो
रित्यन्नाद्यकामो ग्निर्वा अन्नादः श्विरतरमिव वा इतरेषां ह्येष ग्निमागच्छंत्यथ
ह मुखत एवाग्निमागच्छंति मुखतोन्नाद्यमश्नुते मुखतः पाप्मानमपघ्नते ह
स्तच्युती जनयंतेति जातवेदतस्माद्धा अङ्गो यजमानो जायते तस्माज्जातवे
न्नानि चत्वारि छंदांसि भवंति चतुष्पादा वै पशवः पश्रूनामवरुध्यै तानि त्रीणि ॥२॥

छंदांसि भवंति त्रयो वा इमे त्रिवृतो लोका एषामेव लोकानामभिजित्यै तेद्वे
छंदसी भवत: प्रतिष्ठाया एव द्विप्रतिष्ठो वै पुरुष श्चतुष्पादा: पशवो यजमा
नमेतद्द्विप्रतिष्ठं चतुष्पात्सु पशुषु प्रतिष्ठापयति ता: पराग्वचनेन पंचविं
शतिर्भवंति पंचविंशोयं पुरुषो दश हस्त्या अंगुलयो दश पाद्या द्वा ऊरू द्वौ बा
हू आत्मैव पंचविंशस्तमिममात्मानं पंचविंशं संस्कुरुते थो पंचविंशं वा ए
तदह: पंचविंश एतस्याह्न: स्तोमस्तत्समेन समं प्रतिपद्यते तस्माद्ध एव पं
चविंशतिर्भवंति तास्त्रि: प्रथमया त्रिरुत्तमयैकया न त्रिंशंन्त्यूनाक्षरा
विराडेन्यूने वै रेत: सिच्यते न्यूने प्राणान्यूनेन्नाद्यं प्रतिष्ठितमेतेषां कामाना

Indira Gandhi National
Centre for the Arts

आरण• मवरुंध्या एतान्कामानवरुंधे य एवं वेदैता अग्निसंपद्यंते बृहती च विराडं
॥३॥ चच्छंदांसि येतस्याह्नः संपन्नामथो अनुष्टुभमनुष्टुबायतनानि ह्याह्न्यानि ॥२॥
गायत्रं प्रउगं कुर्यादित्याहुस्तेजो वै ब्रह्मवर्चसं गायत्री तेजस्वी ब्रह्मवर्चसी
भवतीत्यौष्णिहं प्रउगं कुर्यादित्याहुरायुर्वा उष्णिगायुष्मान्भवतीत्यानुष्टु
भं प्रउगं कुर्यादित्याहुः क्षत्रं वा अनुष्टुप् क्षत्रस्याप्त्या इति बार्हतं प्रउगं कुर्या
दित्याहुः श्रीर्वै बृहती श्रीमान्भवतीति पांक्तं प्रउगं कुर्यादित्याहुरन्नं वै प
ङ्क्तिरन्नवान्भवतीति त्रैष्टुभं प्रउगं कुर्यादित्याहुर्वीर्यं वै त्रिष्टुब्वीर्यवान्भव
तीति जागतं प्रउगं कुर्यादिहुर्जागता वै पशवः पशुमान्भवतीति तद्गायत्र ॥३॥
त्या१

मेव कुर्याद्ब्रह्म वै गायत्री ब्रह्मैतदहर्ब्रह्मणैव तद्ब्रह्म प्रतिपद्यते तदु माधु
छंदसं मधु ह स्म वा ऋषिभ्यो मधुछंदाश्छंदति तन्मधुछंदसो मधुछंदस्त्व
मथो अन्नं वै मधु सर्वं वै मधु सर्वे वै कामा मधु तद्यन्माधुछंदसं शंसति
सर्वेषां कामानामवरुध्यै सर्वान्कामानवरुंधे य एवं वेद तद्धैका हिकं रू
पसमृद्धं बहु वा एतस्मिन्नहनि किंच किंच वारुणं क्रियते शांत्या एवं शां
तिर्वै प्रतिष्ठैकाहः शांत्यामेव तत्प्रतिष्ठायामंततः प्रतितिष्ठंति प्रतितिष्ठ
ति य एवं वेद येषां चैवं विद्वानेतद्धोता शंसति ॥३॥ वायवायाहि दर्शतेमे
सोमा अरंकृता इति तद्वा अहरहर्यजमानाय च देवेभ्यश्चारंहास्मा एतदह
रूसे१

Indira Gandhi National
Centre for the Arts

र्भवतियएवंवेदयेषांचैवंविद्वानेतद्धोताशंसतीन्द्रवायूइमेसुताआया
तमुपनिष्कृतमितियद्वैनिष्कृतंतत्संस्कृतंमाहास्यैंद्रवायूसंस्कृतंगछतोय
एवंवेदयेषांचैवंविद्वानेतद्धोताशंसतिमित्रंहुवेपूतदक्षंधियंघृताचींसा
धंतेतिवाग्वैधीर्घृताचीवाचमेवास्मिंस्तद्दधातियएवंवेदयेषांचैवंवि
द्वानेतद्धोताशंसत्यश्विनायज्वरीरिषइत्यन्नंवाइषोन्नाद्यस्यावरुध्यैआ
यातंरुद्रवर्त्तनीइत्याहास्याश्विनोयज्ञंगछतोयएवंवेदयेषांचैविद्वाने
तद्धोताशंसतींद्रायाहिचित्रभानविंद्रायाहिधियेषितइंद्रायाहितूतुजा
नइत्यायाह्यायाहीतिशंसत्याहास्येंद्रोयज्ञंगछतियएवंवेदयेषांचैवंवि ॥४॥

द्वानेतद्धोताशंसत्योमासश्चर्षणीधृतोविश्वेदेवासआगतेत्याहास्य
विश्वेदेवाहवंगछंतियएवंवेदयेषांचैवंविद्वानेतद्धोताशंसतिदाश्वां
सोदाशुषःसुतमितियद्वाहददुषोददुषःसुतमित्येवतद्वाहददतिह्यस्मैतं
कामंदेवायकामएतत्छंसतियएवंवेदयेषांचैवंविद्वानेतद्धोताशंसति
पावकानःसरस्वतीयज्ञंवष्टुधियावसुरितिवाग्वैधियावसुर्वाचमेवास्मिं
स्तद्दधातियएवंवेदयेषांचैवंविद्वानेतद्धोताशंसतियज्ञंवष्टितियद्वाह
यज्ञंवहत्वित्येवतद्वाहताःपराग्वचनेनैकविंशतिर्भवंत्येकविंशोयंपुरुषो
दशहस्त्याअंगुलयोदशपाद्याआत्मैकविंशस्तमिममात्मानमेकविंशंस

Indira Gandhi National
Centre for the Arts

स्कुरुते ताभिः प्रथमया त्रिरुत्तमया पंचविंशतिर्भवंति पंचविंश आत्मा पं
चविंशः प्रजापतिर्दश हस्त्या अंगुलयो दश पाद्या द्वा ऊरू द्वौ बाहू आत्मैव पंच
विंशस्तमिममात्मानं पंचविंशं संस्कुरुतेऽथो पंचविंशो वा एतदहः पंचविंश
एतस्याह्नः स्तोमः स्तत्समेन समं प्रतिपद्यते तस्माद्व एव पंचविंशतिर्भवं
ति भवंति ॥ इति प्रथमारण्यके प्रथमोध्यायः ॥ राम ॥ ओम् ॥ आ त्वा रथं
यथोतय इदं वसो सुतमंध इति मरुत्वतीयस्य प्रतिपदनुचरावैकाहिकौ
रूपसमृद्धौ बहु वा एतस्मिन्नहनि किंच किंच वारुणं क्रियते शांत्या एव शां
तिर्वै प्रतिष्ठैकाहः शांत्यामेव तत्प्रतिष्ठायामंततः प्रतितिष्ठंति प्रतितिष्ठति ॥५॥

य एवं वेद येषां चैवं विद्वानेतद्धोता शंसतीद्रं नेदीय एदिहि प्र स्तूतिरशाची
भिर्यं त उ स्थिन इंद्रसुस्थं वा एतदहः सुस्थवद्रूपसमृद्धमेतस्याह्नो रूपं प्रैतु ब्रह्म
णस्पतिरच्छा वीरमिति वीरवद्रूपसमृद्धमेतस्याह्नो रूपमुत्तिष्ठ ब्रह्मणस्पते सु
वीर्यमिति वीर्यवद्रूपसमृद्धमेतस्याह्नो रूपं प्र नूनं ब्रह्मणस्पतिर्मंत्रं वदत्यु
क्थ्यमिति सुस्थं वा एतदहः सुस्थवद्रूपसमृद्धमेतस्याह्नो रूपमग्निर्नेता सवृ
त्रहेति वार्त्रघ्नमिंद्ररूपमेतद्धमेतदहरेतस्याह्नो रूपं त्वं सोम क्रतुभिः सुक्रतु
र्भूस्त्वं वृषा वृषत्वेभिर्महित्वेति वृषण्वद्वा इंद्रस्य रूपमेंद्रमेतदहरेतस्याह्नो
रूपं पिन्वंत्यपो मरुत्वन्तमिहे विनयंति वाजिनमिति वाजिमद्वा इंद्रस्य रूपमेंद्र

Indira Gandhi National Centre for the Arts

आरण० ॥
॥ ६ ॥

मेतदहरेतस्याह्नोरूपंमथोउतंसंदुहंतिस्तनयंतमक्षितमितिस्तनयद्वाइं
द्रस्यरूपमैंद्रमेतदहरेतस्याह्नोरूपंप्रवइंद्रायबृहतइतियद्वैबृहत्तन्म
हन्महद्वद्रूपसमृद्धमेतस्याह्नोरूपंबृहदिंद्रायगायतेतियद्वैबृहत्तन्मह
न्महद्वद्रूपसमृद्धमेतस्याह्नोरूपंनकिःसुदासोरथंपर्यासनरीरमदि
तिपर्यस्तवद्वांतिमद्रूपसमृद्धमेतस्याह्नोरूपंसर्वान्वागाथांछंसतिसर्वे
षामह्नामाप्त्यैसर्वेषामुक्थानांसर्वेषांपृष्ठानांसर्वेषांशस्त्राणांसर्वेषां
प्रउगाणांसर्वेषांसवनानां॥१॥५॥असत्सुमेजरितःसाभिवेगःसत्य
ध्वृतमितिशंसतिसत्यंवाएतदहःसत्यवद्रूपसमृद्धमेतस्याह्नोरूपंत ॥६॥

दुवासुक्रंब्रह्मवैवसुक्रोब्रह्मैतदहर्ब्रह्मणैवतद्ब्रह्मप्रतिपद्यंतेतदाहुर
धकस्माद्वासुक्रेणैतन्मरुत्वतीयंप्रतिपद्यतइतिनहवाएतेन्योवसुक्रान्म
रुत्वतीयमुदयच्छन्नविव्याचेतितस्माद्वासुक्रेणैवैतन्मरुत्वतीयंप्रतिपद्य
तेतदनिरुक्तंप्राजापत्यंशंसत्यनिरुक्तोवैप्रजापतिःप्रजापतेराप्त्यैस
कृदिंद्रंनिराहतेनैंद्राद्रूपान्नप्रच्यवतेपिबासोममभियमुग्रतर्दइतिशंस
त्यूर्वंगव्यंमहिगृणानइंद्रेतिमहद्वद्रूपसमृद्धमेतस्याह्नोरूपंतदुभारद्वा
जंभरद्वाजोहवाऋषीणामनूचानतमोदीर्घजीवितमस्तपस्वितमआसस
एतेनसूक्तेनपाप्मानमपाहततद्यद्भारद्वाजंशंसतिपाप्मनोपहत्याअ

Indira Gandhi National Centre for the Arts

आरण्
॥७॥
नूचानो दीर्घजीवीतपस्व्यसानीतितस्माद्भारद्वाजंशंसतिकयाशुभास
वयसःसनीळाइतिशंसत्यायुर्वासतेप्रतिहर्यंसुस्थेस्वस्थंवाएतदहरुक्थ
वद्रूपसमृद्धमेतस्याह्नोरूपंतदुकयाशुभीयमेतद्वैसंज्ञानंसंतनिसूक्तं
यत्कयाशुभीयमेतेनहवाइंद्रोगस्त्योमरुतस्तेसमजानततद्यत्कया
शुभीयंशंसतिसंज्ञात्याएवतदायुष्यंतद्योस्यप्रियःस्यात्कुर्यादेवास्य
कयाशुभीयंमरुत्वांइंद्रवृषभोरणायेतिशंसतींद्रवृषन्इतिवृषण्वद्वा
इंद्रस्यरूपमैंद्रमेतदहरेतस्याह्नोरूपंतदुवैश्वामित्रंविश्वस्यहवैमित्रं ॥राब्र॥
विश्वामित्रआसविश्वंहास्मैमित्रंभवतियएवंवेदयेषांचैवंविद्वाने ॥७॥

तद्धोताशंसतिजनिष्ठाउग्रःसहसेतुरायेतिनिविद्धानमैकाहिकंरूपसमृद्धं
बहुवाएतस्मिन्नहनिकिंचकिंचवारुणंक्रियतेशांत्याएवशांतिर्वैप्रति
ष्ठैकाहःशांत्यामेवतत्प्रतिष्ठायामंततःप्रतितिष्ठतिप्रतितिष्ठतियएवंवेद
येषांचैवंविद्वानेतद्धोताशंसतिताःपराग्वचनेनसप्तनवतिर्भवंतिसाया
नवतिस्तिस्रस्तास्त्रिंशिन्योविराजोथयाःसप्तातियंतियेवैषाप्रशंसासा
ष्ययस्यतस्याएवंतास्त्रिःप्रथमयात्रिरुत्तमयैकशतंभवंतिपंचांगुलयश्च
तुष्पर्वाद्विकक्षसीदोश्चाक्षश्वासफलकंचसापंचविंशतिःपंचविंशानीत
राणिद्व्यंगानितच्छतमात्मैकशततमोयछतंतदायुरिंद्रियंवीर्यंतेजोयज

Indira Gandhi National Centre for the Arts

आर॰ए॰॥ मानएकशततमंआयुषीद्रियेवीर्येतेजसिप्रतिष्ठितंस्तास्त्रिष्टुभमभिसं
॥८॥ पद्यंतेत्रैष्टुभोहिमध्यंदिनंः॥२॥६॥तदाहुःकिंप्रेंखस्यप्रेंखत्वमित्ययंवैप्रें
खोयोयंपवतएषह्येषुलोकेषुप्रेंखतइतितत्प्रेंखस्यप्रेंखत्वमेकंफलकं
स्यादित्याहुरेकधाह्येवायंवायुःपवतेस्यरूपेणेतितन्नादृत्यंत्रीणिफ
लकानिस्युरित्याहुस्त्रयोवाइमेत्रिवृतोलोकाएषांरूपेणेतितत्तन्नादृ
त्यंद्वेएवस्यातांद्वौवाइमौलोकौवद्धातमाविवदृश्येतेयउएनेअंतरे ॥सो॰ऋ॥
णाकाशःसोंतरिक्षलोकस्तस्माद्वेएवस्यातामौदुंबरेस्यातामूर्ग्वाअ ॥८॥
न्नाद्यमुदुंबरऊर्जोन्नाद्यस्यावरुध्यैमध्यतउद्नेस्यातांमध्यतोवैप्र
स्वा

त्ताअन्नंधिनोतिमध्यतएवतदन्नाद्यस्ययजमानंदधात्युंजन्योरज्ज
वोभवंतिदक्षिणाश्वसव्याश्वेदक्षिणावाएकेषांपशूनांरज्जवःसव्या
एकेषांतद्यदुजन्योरज्जवोभवंत्युभयेषांपशूनामाप्त्येदार्भ्यःस्युर्दर्भो
वाओषधीनामपहतपाप्मातस्माद्दार्भ्यःस्युः॥७॥३॥अरत्निमात्रउप
रिष्टूमेःप्रेंखस्यादित्याहुरेतावतावैस्वर्गालोकाःसंमिताइतितन्नना
दृत्यंप्रादेशमात्रस्यादित्याहुरेतावतावैप्राणाःसंमिताइतितन्नन्नादृ
त्यंमुष्टिमात्रस्याद्देतावतावैसर्वमन्नाद्यंक्रियतएतावतासर्वमन्नाद्य
मभिपन्नंतस्मान्मुष्टिमात्रएवस्यात्सुरस्तात्प्रत्यंचंप्रेंखमधिशेहेद्दि

Indira Gandhi National Centre for the Arts

॥ आरला० ॥ त्याहुरेतस्यरूपेणायएषतपतिपुरस्ताध्येषइमांलोकान्प्रत्यङ्ङधिरो
॥ ९ ॥ हतीतितत्तन्नादृत्यंतिर्यंचमधिरोहेदित्याहुस्तिर्यंचंवाअश्वमधिरो
हंतितेनोसर्वान्कामानवाप्नवामेतितत्तन्नादृत्यमन्वंचमधिरोहेदित्याहु
यं रनूचीवैनावमधिरोहंतिनौर्वैषास्वर्ग्यायणीयस्त्रेंखइतितस्मादन्वंच
मेवाधिरोहेच्छुबुकेनोपस्पृश्योंछुकोहैवंवृक्षमधिरोहतिसउवयसा
मन्नाद्यतमइतितस्माच्छुबुकेनोपस्पृश्योंबाहुभ्यामधिरोहेदेवंश्येनो ॥ सां ब्र ॥
वयांस्यभिनिविशतएवंवृक्षंसउवयसांवीर्यवत्तमइतितस्माद्बा
हुभ्यामधिरोहेदस्येपादन्नोछिंद्यान्नेदस्येप्रतिष्ठायाउछिद्याइति ॥ ९ ॥

(गो)
प्रेंखंहोताधिरोहंत्योदुंबरीमासंदीमुद्गातावृषावैप्रेंखोयोषासंदीतन्मि
थुनंमिथुनमेवतदुक्थमुखेकरोतिप्रजात्यैप्रजायतेप्रजयापशुभिर्यए
वंवेदाथान्नंवैप्रेंखःश्रीरासंद्यन्नंचैवतच्छ्रियंचान्वधिरोहतोवृसीहोत्रकाः
समधिरोहंतिसब्रह्मकाःसमुत्सृप्यवाओषधिवनस्पतयःफलंगृह्णंति
तद्यदेतस्मिन्नहनिसर्वशःसमधिरोहंतीषमेवतदूर्जमन्नाद्यमधिरोहंत्यू
र्जोन्नाद्यस्यावरुध्यैवषट्कृत्यावरोहेदित्याहुस्तत्तन्नादृत्यमकृतावैसापचि
तिर्यामपरूयंतकरोतिनिग्रह्यनक्षमवरोहेदित्याहुस्तत्तन्नादृत्यमकृतावै

Indira Gandhi National Centre for the Arts

॥आरण्य॥
॥१०॥

सापचितिर्यां मध्यष्ठायकरोति प्रतिख्याय भक्षमवरोहेद्देषा वा अपचि
तिर्यां पश्यते करोति तस्मात्प्रतिख्यायैव भक्षमवरोहेत्प्राङ्वरोहेत्प्राग्वै
देवरेतः संप्रजायते तस्मात्प्राङ्वरोहेदवरोहेत् ॥ ५ ॥ ८ ॥ इति प्रथमारण्य
के द्वितीयोध्यायः ॥ राम ॥ ॐम् ॥ हिंकारेणेन तदहः प्रतिपद्येतेत्याहुर्ब्रह्म वै
हिंकारो ब्रह्मैतदहर्ब्रह्मणैव तद्ब्रह्म प्रतिपद्यते य एवं वेद यदेव हिंकारे
ण प्रतिपद्यता ३ इ एषा वै हिंकारो योषर्क्यमिथुनं मिथुनमेव तदुक्थमुखे सांन् ॥
करोति प्रजात्यै प्रजायते प्रजया पशुभिर्य एवं वेद यदेव हिंकारेण प्रति ॥१०॥

पद्यता ३ इ यथा वा अग्निरेवं ब्रह्मणो हिंकारो यद्वै किंचाग्निया जितित्व
त्सर्यन्त्येवैनन्तृणत्त्येवं यं कामं कामयते हिंकारेणाभ्येवैनं तृणत्तिय एवं
वेद यद्देव हिंकारेण प्रतिपद्यता ३ इ वाचो वा एषा व्यावृत्तिर्दैव्यै च मानुष्यै
चैय द्धिंकारः स यद्धिंकृत्य प्रतिपद्यते वाचमेव तद्व्यावर्तयति दैवीं च मा
नुषीं च ॥ ९ ॥ १ ॥ तदाहुः केन स्याद्धुः प्रतिपदिति मनश्च वाक्चेति ब्रूयात्सर्वे वै
न्यस्मिन्कामाः श्रिताः सर्वानन्या कामान्दुहे मनसि वै सर्वे कामाः श्रिता म
नसा हि सर्वान्कामान्ध्यायति सर्वे हास्मिन्कामाः श्रयंते य एवं वेद वा

Indira Gandhi National Centre for the Arts

॥आरण्॰॥ ॥११॥ ग्वै सर्वान्कामान्दुहे वाचा हि सर्वान्कामान्वदति सर्वान्हास्मै कामान्वाग्दुहे
य एवं वेद तद्धाहुर्नैतदह ऋचा न यजुषा न साम्ना प्रत्यक्षात्प्रतिपद्येतैन
र्चा न यजुषा न साम्नेत्याहुरिति तदेता एव व्याहृतीः पुरस्ताज्जपेद्भूर्भुवः
स्वरित्येता वाव व्याहृतय इमे त्रयो वेदा भूरित्येव ऋग्वेदो भुव इति य
जुर्वेदः स्वरिति सामवेदस्तन्नर्चा न यजुषा न साम्ना प्रत्यक्षात्प्रतिपद्य ॥सांब्रा॥
तैनर्चा न यजुषा न साम्नैति ॥१०॥२॥ तद्धितिप्रतिपद्यते तन्न हितिवा अ
न्नमन्नमेव तदभिप्रतिपद्यते एतां वाव प्रजापतिः प्रथमां वाचं व्याह ॥११॥

रदेकाक्षरद्व्यक्षरां ततेतितातेतितिथैवैतत्कुमारः प्रथमवादी वाचं व्याहर
त्यैकाक्षरद्व्यक्षरां ततेतितातेतितियेवतत्तत्त्वया वाचा प्रतिपद्यते तैनदु
क्तमृषिणा बृहस्पते प्रथमं वाचो अग्रमित्येतद्ध्येव प्रथमं वाचो अग्रं य
त्प्रैरत नामधेयं दधाना इति वाचा हि नामधेयानि धीयन्ते यदेषां श्रेष्ठं
यदरिप्रमासीदित्येतद्ध्येव श्रेष्ठमेतदरिप्रं प्रेणा तदेषां निहितं गुहाविरि
तीदमु ह गुहाध्यात्ममिमा देवतास्तदु आविरधिदेवतमित्येतत्तदुक्तं भव
ति ॥११॥३॥ तद्दिदास भुवनेषु ज्येष्ठमिति प्रतिपद्यते एतद्वाव भुवनेषु

Indira Gandhi National Centre for the Arts

ज्येष्ठंयतोजज्ञउग्रस्त्वेषनृम्णइत्यतोह्येषजातउग्रस्त्वेषनृम्णःसद्योज
ज्ञानोनिरिणातिशत्रूनितिसद्योह्येषजातःपाप्मानमपाहतानुयंविश्वेम
दंत्यूमाइतिभूतानिवैविश्वऊमास्तएनमनुमदंत्युदगादुदगादितिवा
वृधानःशवसाभूर्योजाइत्येषवैवावृधानःशवसाभूर्योजाःशत्रुर्दास
यभियसंदधातीतिसर्वंह्येतस्माद्बिभायाव्यनच्चव्यनच्चसस्नीतियच्चप्रा
णियच्चाप्राणमित्येवतदाहसंतेनवंतप्रभृतामदेष्वितितवसर्ववशमित्ये ॥सा॰वृ॥
वतदाहत्वेक्रतुमपिवृंजंतिविश्वइतित्वयीमानिसर्वाणिभूतानिसर्वा ॥१२॥

णिमनांसिसर्वेक्रतवोपिवृंजंतीत्येवतदाहद्विर्यदेतेत्रिर्भवंत्यूमाइतिद्वौवै
संतौमिथुनौप्रजायेतेप्रजात्यैप्रजायतेप्रजयापशुभिर्यएवंवेदस्वादो
स्वादीयःस्वादुनासृजासमितिमिथुनंवैस्वादुप्रजास्वादुमिथुनेनैवत
त्प्रजांसंसृजत्यदःसुमधुमधुनाभियोधीरितिमिथुनंवैमधुप्रजामधु
मिथुनेनैवतत्प्रजामभियुध्यतितदुक्तमृषिणास्वांयत्तनूंतन्वामैरयतेत्य
स्यांशारीरीमिमांछंदोमयीमित्येवतदाहयोतनूरेवतन्वोअस्तभेष
जमित्यस्यैशारीर्याइयंछंदोमयीत्येवतदाहतस्यैयान्यष्टावक्षराणि

Indira Gandhi National Centre for the Arts

॥आरण्य॥
॥१३॥

सागायत्रीयान्येकादशसात्रिष्टुब्यानिद्वादशसाजगत्यथयानिदशसावि
राडृशिन्येषुत्रिषुछंदःसुप्रतिष्ठितापुरुषइतित्र्यक्षरंसउविराज्येतानिंवा
वसर्वाणिछंदांसियान्येतानिविराट्चतुर्थान्येवमुहैववैविदुषएतदहः
सर्वैश्छंदोभिःप्रतिपन्नंभवति॥१२॥तानदेनविहरतिपुरुषोवैनदस्त
स्मात्पुरुषोवदन्सर्वःसंनदतीवनदइवओदतीनामेति॥१३॥आपोवाओ
दत्योयादिव्यास्ताहीदंसर्वमुदत्यापोवाओदत्योयामुख्यास्ताहीदंसर्व ॥सांवृ॥
मन्नाद्यमुदतिनदयोयुवतीनामेति॥१४॥आपोवावयोयुवत्योयाअंत ॥१३॥

रिक्ष्यास्ताहिपोह्ययंतइवापोवावयोयुवत्योयाःस्वेदतेनाहिसरीसृप्यं
तद्रूवपतिवोअघ्यानामेति॥१५॥आपोवाअघ्यायाअग्नेर्धूमाज्जायंते
आपोवाअघ्यायाःशिश्नास्रसृज्यंतेघेनूनामिषुध्यसीति॥१६॥आपोवा
वधेनवस्ताहीदंसर्वंधिन्वंतीषुध्यसीतियदाहपतीयसीत्येवतदाहत्रि
ष्टुभंचानुष्टुभंचविरहतिवृषावैत्रिष्टुब्योषानुष्टुप्तन्मिथुनंतस्मा
देपिपुरुषोजायांविलाकृत्स्नतरमिवात्मानंमन्यतेतास्त्रिःप्रथमयापंच
विंशतिर्भवतिपंचविंशआत्मापंचविंशःप्रजापतिर्दशहस्त्याअंगुल

Indira Gandhi National Centre for the Arts

॥आरण॰ योदशपाद्यो द्वाऊरू द्वौ बाहू आत्मैव पंचविंशस्तमिममात्मानं पंचविंशं
॥१४॥ संस्कुरुते यो पंचविंशो वा एतदहः पंचविंश एतस्याह्नस्तोमः स्तत्समे
न समं प्रतिपद्यते तस्माद्ध एव पंचविंशतिर्भवति ॥१३॥ तदिति प्रतिप
द्यते तन्नदिति वा अन्नमन्नमेवं तदभि प्रतिपद्यते एतां वाव प्रजापतिः
प्रथमां वाचं व्याहरदेकाक्षरद्व्यक्षरां ततेति तातेति तथैवैतत्कुमारः ॥सा॰ ब्र॥
प्रथमवादी वाचं व्याहरत्येकाक्षरद्व्यक्षरां ततेति तातेति तयैवतत्तत्तव
त्यां वाचा प्रतिपद्यते न दुश्चर्म विशाद्बृहस्पते प्रथमं वाचो अग्रमित्येत ॥१४॥

द्ध्येव प्रथमं वाचो अग्रं यत्प्रैरत नामधेयं दधाना इति वाचा हि नाम
धेयानि धीयंते यदेषां श्रेष्ठं यदरिप्रमासीदित्येतद्ध्येव श्रेष्ठमेतदरि
प्रं प्रेणा तदेषां निहितं गुहाविरिती दमु ह गुहाध्यात्ममिमा देवता अ
द उ आविरधि देवतमित्येतन्न दुश्चर्मा भवति ॥१४॥ तदिदास भुवनेषु ज्ये
ष्ठमिति प्रतिपद्यते यद्वै ज्येष्ठं तन्महन्महद्रूपसमृद्धमेतस्याह्नो रू
पं तां सुते कीर्त्तिं मघवन्महित्वेति महद्रूपसमृद्धमेतस्याह्नो रूपं त्वे
यद्भावद्धे वीर्याये ति वीर्यवद्रूपसमृद्धमेतस्याह्नो रूपं न णामुत्वान

Indira Gandhi National
Centre for the Arts

॥आरण्य०॥ ॥१५॥ तमंगीर्भिरुक्थेभिरित्युक्थं वा एतदहरुक्थवद्रूपसमृद्धमेतस्याह्नो रू
पंन्यूनाक्षरे प्रथमे पदे विहरति न्यूने वै रेतः सिच्यते न्यूने प्राणान्यू
नेन्नाद्यं प्रतिष्ठितं मे तेषां कामानामवरुध्यै एतान्कामानवरुंधे य
एवं वेदं द्वे दशाक्षरे भवतस्तयोरन्नाद्ययो रूपाप्त्यै यच्च पदद्वयं च पा
दकमित्यष्टादशाष्टादशाक्षराणि भवंति यानि दशान वप्राणा आत्मै
वदशमः सात्मनः संस्कृतिरष्टावष्टाउद्यंते श्रुतेय यत्कामयते यए ॥सा ब्र॥
वंवेद॥१५॥ तानदेन विहरति प्राणो वै नदस्तस्मात्प्राणेन दः सर्वः स ॥१५॥

न्नदतीव नदं व ओदती नामितीशुउष्णिगक्षरैर्भवत्यनुष्टुप्पादे रायु
र्वीउष्णिग्वा गनुष्टुप्तदस्मिन्नायुश्च वाचं च दधाति ताः त्रिः प्रथमया पं
चविंशतिर्भवंति पंचविंश आत्मा पंचविंशः प्रजापतिर्दशहस्त्या अंगुल
योदशपाद्या द्वा ऊरू द्वौ बाहू आत्मैव पंचविंशस्तमिममात्मानं पंचवि
शं संस्कुरुतेथो पंचविंशो वा एतदहः पंचविंश एतस्याह्नस्तोमस्तत्स
मेन समं प्रतिपद्यते तस्माद्वै एव पंचविंशतिर्भवंतीत्यध्यात्मं पंचवि
शो थाधिदैवतं चक्षुः श्रोत्रं मनो वाक्प्राणस्ता एताः पंचदेवता इमं वि

Indira Gandhi National
Centre for the Arts

षाःपुरुषंपंचोहैवैतादेवताअयंविष्टःपुरुषःसोत्रालोमभ्यआनखे
भ्यःसर्वःसंगआप्यतेतस्मात्सर्वाणिभूतान्यापिपीलिकाभ्यआत्मान्ये
वजायंतेतदुक्तमृषिणासहस्रधापंचदशान्युक्थेतिपंचहिदशातोभ
वंतियावद्द्यावापृथिवीतावदित्तदितियावतीवैद्यावापृथिवीतावाना
त्मासहस्रधामहिमानःसहस्रमित्युक्थान्येवतदनुमदतिमहयंतिया
वद्ब्रह्मविष्ठितंतावतीवागितियत्रहक्वचब्रह्मतद्वाग्यत्रवावाक्तद्वा
ब्रह्मेत्येतत्तदुक्तंभवत्येषांवाएषांस्तुक्तानांनवर्चंप्रथमंनववैप्राणाः ॥१६॥

प्राणानांक्लृप्त्यैषळृचंभवतिषड्वाऋतवऋतूनामाप्त्यैपंचर्चंभवति
पंचपदापंक्तिःपंक्तिर्वाअन्नमन्नाद्यस्यावरुध्यैतृचोभवतित्रयोवाइमे
त्रिवृतालोकाएषामेवलोकानामभिजित्यैतात्रिसंपद्यंतेबृहतीछंदो
मृतंदेवलोकमेषआत्मेवमुहैवैवंविदेतयेवसंपदामृतमेवात्मानम
भिसंभवतिसंभवति ■८■१६■इतिप्रथमारण्यकेतृतीयोध्यायः ■
राम ■ ॐ ॥ अथसूददोहाःप्राणोवैसूददोहाःप्राणेनपर्वाणिसंदधा
त्यथातोग्रीवास्ताआचक्षतेयथाछंदसमुष्णिहइत्यथसूददोहाःप्रा

Indira Gandhi National
Centre for the Arts

॥आरण्य०॥ ॥१७॥ णो वै सूददोहाः प्राणेन पर्वाणि संदधात्यथातः शिरस्तद्गायत्रीषु भवत्य
ग्रं वै छंदसां गायत्र्यग्रमंगानां शिरस्तदर्कवतीषु भवत्यग्निर्वा अर्क
स्तान्भवंति नव कपालं वै शिरो दशमी शंसति त्वक्केशा इत्येव सा भवत्य
थो स्तोमातिशंसनाया एवैतो त्रिवृच्च स्तोमो भवतो गायत्रं च छंदएत
द्यो वै स्तोमछंदसोः प्रजा तिमनु सर्वमिदं प्रजायते यदिदं किंच प्रजा
त्ये प्रजायते प्रजया पशुभिर्य एवं वेदाथ सूददोहाः प्राणो वै सूददोहाः
प्राणेन पर्वाणि संदधात्यथातो विराजो भवंति तस्मात्पुरु ॥१७॥

× प्राणो वै सूददोहाः २

षः पुरुषमाहर्विराडस्यस्मासु राजसि ग्रीवा वै धारयसीति स्तनमानं
वाय द्वादुताः संबाह्वतमाः सत्योऽन्नतमा प्रत्यच्यं तैन्नं हि विराळन्नमु वीर्य
मथ सूददोहाः प्राणेन पर्वाणि संदधाति ॥१॥१७॥ अथातो दक्षिणः
पक्षः सोयं लोकः सोयमग्निः सा वाक्तद्रथंतरं स वसिष्ठस्तच्छतं तानि
षड्वीर्याणि भवंति संपात एव कामानामाप्त्यात्यै प्रतिष्ठित्या अन्नाद्यायपं
क्तिरथ सूददोहाः प्राणो वै सूददोहाः प्राणेन पर्वाणि संदधात्यथात उ
त्तरः पक्षः सोसौ लोकः सोसावादित्यस्तन्मनस्तद्बृहत्स भरद्वाजस्तच्छ

Indira Gandhi National Centre for the Arts

आरण० ॥ १८ ॥

तं तानि षड्वीर्याणि भवन्ति संपात एव कामानामभ्याप्त्यै प्रतिष्ठित्या अ
न्नाद्याय पंक्तिस्ता ऊनातिरिक्ता भवन्तो वृषा वै बृहद्योषा रथन्तरमति
रिक्तं वै पुंसो न्यूनं स्त्रियै तस्मादूनातिरिक्ता भवन्ति थो एकेन ह वै पत्रे
ण सुपर्णस्योत्तरः पक्षो ज्यायांस्तस्मादेकयर्चोत्तरः पक्षो भूयान्भवं
त्यथ सूददोहाः प्राणो वै सूददोहाः प्राणेन पर्वाणि संदधात्यथातः
पुच्छं ता एकविंशति द्विपदा भवन्त्येकविंशतिर्ह्येमानि प्रत्यंचि सुपर्ण
स्य पत्राणि भवन्त्यथो एकविंशो वै स्तोमानां प्रतिष्ठा प्रतिष्ठा पुच्छं वय ॥१८॥

सां द्वाविंशी शंसति प्रतिष्ठयोरेव तद्रूपं क्रियते तस्मात्सर्वाणि वयांसि पु
च्छेन प्रतितिष्ठन्ति पुच्छेनेव प्रतिष्ठायोत्पतन्ति प्रतिष्ठा हि पुच्छं स एष द्वाभ्यां
दशिनीभ्यां विराड्भ्यामनयोर्द्वाविंश्योर्द्विपदयोरयं पुरुषः प्रतिष्ठित
स्तस्य यत्सुपर्णरूपं तदस्य कामानामभ्याप्त्या अथ यत्पुरुषरूपं त
दस्य श्रियै यशसेन्नाद्याय प्रतिष्ठित्या अथ सूददोहा अथ धाय्याथ सू
ददोहा वृषा वै सूददोहा योषा धाय्या तद्धुन्नयतः सूददोह साधाय्यां
परिशंसति तस्माद्द्वयोरेतः सिक्तं सदेकतामेवाप्येति योषामेवाभ्येत

Indira Gandhi National
Centre for the Arts

आरण-॥ आज्ञानाह्रियो षातः प्रज्ञानां तस्मादेनामत्र शंसति ॥२॥१८॥ गायत्रीतृ
॥१९॥ चाशीतिं शंसत्ययं वै लोको गायत्रीतृचाशीतिर्यद्वा अस्मिंल्लोके यशो
यन्म होयन्नु मिथुनं यदन्नाद्यं यापचितिस्तदश्नवै तदाप्नवानि तदव
रुन्धे तन्मे सदित्यथ सूददोहाः प्राणो वै सूददोहाः प्राणेनेमं लोकं सं
तनोति बार्हतीतृचाशीतिं शंसत्यंतरिक्षलोको वै बार्हतीतृचाशी
तिर्यद्वांतरिक्षलोके यशो यन्म होयन्मिथुनं यदन्नाद्यं यापचिति
स्तदश्नवै तदाप्नवानि तदवरुन्धे तन्मे सदित्यथ सूददोहाः प्राणो ॥१९॥

ओं
वै सूददोहाः प्राणेनांतरिक्षलोकं संतनोत्यौष्णिहीतृचाशीतिं शंस
त्यसौ वै लोको द्यौरौष्णिहीतृचाशीतिर्यद्वा अमुष्मिंल्लोके यशो यन्म
होयन्मिथुनं यदन्नाद्यं यापचितिर्यद्देवानां देवं तदश्नवै तदाप्नवा
नि ॥ तदवरुन्धे तन्मे सदित्यथ सूददोहाः प्राणो वै सूददोहाः प्राणे
नामुं लोकं संतनोति संतनोति ॥३॥२०॥ इति प्रथमारण्यके चतुर्थो
ध्यायः ॥ राम ॥ श्रीराम ॥ वशं शंसति वशो मइदं सर्वमसदिति ता एक
विंशतिर्भवंत्येकविंशतिर्हिता अंतरुदरे विकृतयो भो एकविंशो वै

Indira Gandhi National Centre for the Arts

आरण०॥
॥२०॥

स्तोमानां प्रतिष्ठा प्रतिष्ठोदरमन्नाद्यानां नाविछंदसो भवति विश्वुद्रमि
व वा अंत स्थ्यमणीय इव च स्थवीय इव च तः प्राणा वं छंदस्कारं यथो
पपादं शंसति यथोपपादमिव वा अंतस्थं ह्रसीय इव च द्राघीय इव च वा
थसूददोहाः प्राणो वै सूददोहाः प्राणेन पर्वाणि संदधाति ता मत्रोत्सृज
ति द्वादशाक्षराः शस्त्वा द्वादश विधा वा इमे प्राणाः सप्तशीर्षण्या द्वौ स्त
न्यौ त्रयो वांच्या त्रवे प्राणा आप्यंते त्र संस्क्रियंते तस्मादेना मत्रोत्सृजं द्द नः
तीदाग्नीयु वं सुन इत्यैंद्राग्ना ऊरू उर्वष्ठीवे प्रति ष्ठे ताः षट्पदा भवंति ॥२०॥

प्रतिष्ठाया एवं द्विप्रतिष्ठो वै पुरुषश्चतुष्पादाः पशवो यजमानमेवत
द्विप्रतिष्ठं चतुष्पात्सु पशुषु प्रतिष्ठापयति द्वितीयास्सप्तपदा भवंति ताग
यत्रीचानुष्टु मं च करोति ब्रह्म वै गायत्री वागनुष्टुब्ब्रह्मणैव तद्वाचं सं
दधाति त्रिष्टुभमंततः शंसति वीर्यं वै त्रिष्टुब्वीर्येणैव तत्पशून्परिगच्छति
तस्मात्पशवो वीर्यमनूपतिष्ठंते ईर्यतां चैवास्थानं च॥ १॥२०॥ प्रवो महे
मंदमानायांधस इत्यैंद्रे निष्केवल्ये निविद्दधाति प्रत्यक्षाध्येव तदात्मन्वीर्यं
धत्ते ता स्त्रिष्टुब्जगत्यो भवंति तदाहुरथ कस्मात्त्रिष्टुब्जगतीषु निविद्दधा

Indira Gandhi National Centre for the Arts

॥आरण॥ तीतिं नह वा एतस्याङ्गं एकं छिद्रो निविदं दधार न विद्याचेति तस्मात्त्रिष्टुप
॥२१॥ जगतीषु निविदं दधाति तदेतदहस्त्रिनिविक्कं विद्यादृशो निविद्धाल खिल्या
निविन्नि विदेव निविदेवमेनं त्रिनिविकं विद्यादथस्मृक्तैवनेन वायोन्यधा
यिचाकं न्यो जात एव प्रथमो मनस्वानिति तयोरस्त्वं न्नेसमस्य यदसन्म
नीषाइत्यं नाद्यस्यावरुध्यै अथावपनमेतं अंतरे रौद्रीणां दशातीनां त्रिष्टु
बुजगतीनां बृहतीसंपन्नानां यावतीर्वपंते तावंत्सूर्ध्वमायुषो वर्षाणि
जीवंत्येतेन हैवावपनेनायुराप्यंते प्रजां मे पशवोर्जयन्तीति त्वेवसजनी
यमनुशंसति ताक्ष्यं शंसति स्वस्त्ययनं वै ताक्ष्यैः स्वस्तितायै स्वस्त्यय ॥२१॥

नमेवतत्कुरुते एकपदां शंसत्येक चो दं सर्वमसानीत्यथो सर्वं छिंदस्कृति
माप्नवानीति इन्द्रं विश्वा अवीवृधन्निति पदानुषंगास्ताः सप्तानुषजति स
प्तवै शीर्षन्प्राणाः शीर्षन्नेवतत्प्राणान्दधात्यष्टमीन्नानुषजति वागष्टमी
नेन्नेवाकु प्राणैरनुषक्तासदिति तस्मादुसा वाक्समानायतनाप्राणैः
सत्यननुषक्ता विराजः शंसत्यन्नं वै विराजो न्नाद्यस्यावरुध्यै वासिष्ठेन
परिदधाति वसिष्ठो सानीत्येषस्तोमो महद्गायवाहद्विति महद्धत्यारू
पसमृद्धया धुरीवालोन वानयन्नधायीत्यं तो वै धूरं तं एतदहरेत

आ॰ २ ए॰॥ स्याह्नो रूपमिंद्र त्वायमर्क ईट्टे वसूनामित्यर्कवत्या रूपसमृद्धया दिवी
॥२२॥ वद्यामघिनः श्रोमतं धा इति त्रेयं ह कं च ब्रह्मण्यावागुद्यते तत्कास्य की
र्त्तिर्भवति यत्रैवं विद्वानेतया परिदधाति तस्मादेवं विद्वानेतयैव परिदध्या
त्॥२॥२१॥ तत्सवितुर्वृणीमहे द्यानो देव सवितरिति वैश्वदेवस्य प्रतिप
दनुचरौ वैकाहिकौ रूपसमृद्धौ बहु वा एतस्मिन्नहनि किंच किंच वा
रुणं क्रियते शांत्या एवं शांतिर्वै प्रतिष्ठैकाहः शांत्यामेव तत्प्रतिष्ठाया
मंततः प्रतितिष्ठंति प्रतितिष्ठति य एवं वेद येषां चैवं विद्वानेतद्धोता ॥२२॥

शंसति तद्देवस्य सवितुर्वार्यं महदिति सावित्रं महतो वै महदंत एतदह
रेतस्याह्नो रूपं कतरा पूर्वा कतरा परायोरिति द्यावापृथिवीयं समा
नोदर्कं समानोदर्कं वा एतदहरेतस्याह्नो रूपमनश्वो जातो अनभी
शुरुक्थ्य इत्यार्भवं रथस्त्रिचक्र इति यदेत त्रिवत्तदंतो वै त्रिवदंत
एतदहरेतस्याह्नो रूपमस्य वामस्य पलितस्य होतुरिति वैश्वदेवं ब
हुरूपं बहुरूपं वा एतदहरेतस्याह्नो रूपं गौरीर्मिमाय सलिलानि त
क्षतीत्येतदंतमानो नद्राः ऋतवो यंतु विश्वत इति वैश्वदेवं निविद्वान

॥आ०र०ण० भेकाद्दिकं रूपसमृद्धं बद्भवाए तस्मिन्नह नि किंच किंच वारणं क्रियते शं
॥२३॥ स्याएवं शं तिर्वै प्रतिष्ठेकाहः शंस्यामेव तत्प्रतिष्ठायामं त तः प्रतितिष्ठतिप्र
तितिष्ठति य एवं वेद येषां चैवं विद्वानेतद्धोतारं शंसति वैश्वानराय धिषणा
मृतावृध इत्याग्निमारुतस्य प्रतिपदं तो वै धिषणां त एतदहरेतस्याह्नो रू
पं प्रयज्यवो मरुतो भ्राजदृष्टय इति मारुतं समानोदर्कं समानोदर्कं वा
एतदहरेतस्याह्नो रूपं जातवेदसे सुनवाम सोममिति जातवेदस्यां पु
रस्तात्सूक्तस्य शंसति स्वस्त्ययनं वै जातवेदस्याः स्वस्तितायै स्वस्त्य ॥२३॥

यनमेव तत्कुरुते इमं स्तोममर्हते जातवेदस इति जातवेदस्यं समा
नोदर्कं समानोदर्कं वा एतदहरेतस्याह्नो रूपमह्नो रूपं ॥ ३ ॥ २२ ॥ इति
प्रथमारण्यके पंचमोध्यायः ॥ प्रथमारण्यः समाप्तः ॥ राम ॥ ओम् ॥ एष
पंथा एतत्कर्मैतद्ब्रह्मैतत्सत्यं तस्मान्न प्रमाद्येत्तन्नातीयान्न ह्यत्याय
न्पूर्वे ये त्यायंस्ते पराबभूवुस्तदुक्तमृषिणा प्रजा ह तिस्रो अत्यायमी
युर्न्य१न्या अर्कमभितो विविश्र इति बृहद्ध तस्थौ भुवनेष्वंतः पवमानो
हरित आविवेशेति प्रजा ह तिस्रो अत्यायमीयुरिति या वै ता इमाः प्र

Indira Gandhi National
Centre for the Arts

जास्तिस्रो अत्यायमायंस्तानीमानि वयांसि वंगावगधाश्चेरपादा न्यन्या
अर्कमभितो विविश्र इति ता इमाः प्रजा अर्कमभितो निविष्टा इममेवाग्निं
बृहद्धतस्थौ भुवनेष्वंतरित्यद उ एव बृहद्भुवनेष्वंत रसावादित्यः पवमा
नो हरित आविवेशेति वायुरेव पवमानो दिशो हरित आविष्टः ॥१॥ रू॥
उक्थमुक्थमिति वै प्रजा वदंति तदिदमेवोक्थमियमेव पृथिवी तो हीदं
सर्वमुत्तिष्ठति यदिदं किंच तस्याग्निरर्कोन्नमशीतयोन्नेन हीदं सर्वम
श्नुतेंतरिक्षमेवोक्थमंतरिक्षं वा अनुपतंत्यंतरिक्षमनुधावयंति तस्य ॥२४॥

वायुरर्कोन्नमशीतयोन्नेन हीदं सर्वमश्नुते सावेव द्यौरुक्थममुतः प्रदा
ना द्धीदं सर्वमुत्तिष्ठति यदिदं किंच तस्यासावादित्योर्कोन्नमशीतयो
न्नेन हीदं सर्वमश्नुत इत्य धिदैवतमथाध्यात्मं पुरुष एवोक्थमयमे
व महान्प्रजापतिरहमुक्थमस्मीति विद्यात्तस्य मुखमेवोक्थं यथा पृ
थिवी तथा तस्य वागर्कोन्नमशीतयोन्नेन हीदं सर्वमश्नुते नासिके एवो
क्थं यथांतरिक्षं तथा तस्य प्राणोर्कोन्नमशीतयोन्नेन हीदं सर्वमश्नुते न
देतद्ध्वस्य विष्ठपं यदेतन्नासिकायै विनतमिव ललाटमेवोक्थं यथा

म०म०गा०सं० २०१०८

आ२ए०॥ द्यौरस्तथा तस्य चक्षुरर्कोऽन्नमशीतयोऽन्नेन हीदं सर्वमश्नुते समानमशी
॥२५॥ तयोर्ध्यात्मं चाधिदैवतं चान्नमेवान्नेन हीमानि सर्वाणि भूतानि सम
नन्तीं ॥ अन्नेनेमं लोकं जयत्यन्नेनामुं तस्मात्समानमशीतयोर्ध्यात्मं चा
धिदैवतं चान्नमेवं तदिदमन्नमन्नादं स्मियमेव पृथिवी तो हीदं सर्वमु
न्निष्ठति यदिदं किंच यदु किंचेदं प्रेत्तौ ३ ई तदसौ सर्वमत्ति यदु किंचातः
प्रेती ॥ तदियं सर्वमत्ति सयमित्याद्याद्यन्नाह वा आद्यो भवति न तस्ये
शेयन्नाद्यो द्येद्येनन्नाद्युः ॥२॥२४॥ अथातो रेतसः सृष्टिः प्रजापते रे ॥२५॥

तो द्यौर्दिवा नां रेतो वर्षं वर्षस्य रेत ओषधय ओषधीनां रेतोऽन्नमन्नस्य
रेतो रेतो रेतसो रेतः प्रजाः प्रजानां रेतो हृदयं हृदयस्य रेतो मनो मनसो रे
तो वाग्वाचो रेतः कर्मैतदिदं कर्म कृतमयं पुरुषो ब्रह्मणो लोकः स इरा
मयो यद्धीराममयस्तस्माद्धिरण्मयो हिरण्मयो ह वा अमुष्मिंल्लोके संभव
तिं हिरण्मयः सर्वेभ्यो भूतेभ्यो दहृशे य एवं वेद ॥ ३ ॥२५॥ तं प्रपदाभ्यां
मेषु प्रापद्यत ब्रह्मे रूषं यत्प्रपदाभ्यां प्रापद्यत ब्रह्मेमं पुरुषं तस्मात्प्रपदे तस्मा
त्प्रपदे इत्याचक्षते शफाः खुरा इत्यन्येषां पशूनां तदूर्ध्वमुदसर्पत्ताऊरू

Indira Gandhi National Centre for the Arts

॥आर०ए०॥ अन्नवतीं मुरू(र)णीहीत्यब्रवीत्तदुदरमन्नवदुर्वै वमेकुर्वित्यब्रवीत्तदुरोन्न

॥२६॥ वदुदरंब्रह्मेतिशार्कराक्ष्याउपासतेहृदयंब्रह्मेत्यारुणयोब्रह्माहैवताउ

र्ध्वंत्वेवोदसर्पत्तच्छिरोश्रयतच्छिरोश्रयततत   च्छिरोभवत्तच्छिरसः यत

शिरस्त्वंताएताःशीर्षञ्छ्रियःश्रिताश्चक्षुःश्रोत्रंमनोवाक्प्राणः श्रयंते

स्मिञ्छ्रियोयएवमेतच्छिरसःशिरस्त्ववेदताअहिंसंताहमुक्थमस्म्यह

मुक्थमस्मीतिताअब्रुवन्हंतास्माच्छरीरादुत्क्रामामतद्यस्मिन्नउत्क्रांतइदं

शरीरंपत्स्यतितदुक्थंभविष्यतीतिवागुदक्रामदवदन्नश्नन्पिबन्नास्ते ॥२६॥

चक्षुरुदक्रामदपश्यन्नश्नन्पिबन्नास्तेवंश्रोत्रमुदक्रामदशृण्वन्नश्नन्पिबन्ना

स्तेवंमनउदक्रामन्मीलितइवाश्नन्पिबन्नास्तेवं १ ×शोध

वंप्राणउदक्रामत्तत्प्राणउत्क्रांतेपद्यततदशीर्यताशारीतीत्तच्छरीरम

भवत्तच्छरीरस्यश रीरत्वंशीर्यतेहवाअस्यद्विषन्पाप्माभ्रातृव्यःपरास्यद्वि

षन्पाप्माभ्रातृव्योभवतियएवंवेदताअहिंसंतैवाहमुक्थमस्म्यहमु

क्थमस्मीतिताअब्रुवन्हंतेदंपुनःशरीरंप्रविशामतद्यस्मिन्नःप्रप

न्नइदंशरीरमुत्थास्यतितदुक्थंभविष्यतीतिवाक्प्राविशदशयदेवं

चक्षुःप्राविशदशयदेवंश्रोत्रंप्राविशदशयदेवंमनःप्राविशदशय

देवंप्राणःप्राविशत्तत्प्राणेप्रपन्नउदतिष्ठत्तदुक्थमभवत्तदेतदुक्थं ॥ ३

म१

Indira Gandhi National
Centre for the Arts

आरण्य०॥
॥२७॥

प्राण एव प्राण उक्थमित्येव विद्यात्तं देवा अब्रुवंस्त्वमुक्थमसि त्वमिदं सर्व
मसि तव वयं स्मस्त्वमस्माकमसीति तदप्येतदृषिणोक्तं त्वमस्माकं
तव स्मसीति ॥४॥२६॥ तं देवाः प्राणयन्त स प्रणीतः प्रातायत प्रातायी
तीति तत्प्रातरभवत्समागादितीति तत्सायमभवदहरेव प्राणो रात्रिर
पानो वागग्निश्चक्षुरसावादित्यश्चन्द्रमा मनो दिशः श्रोत्रं स एष प्रहि
तां संयोगोऽध्यात्ममिमा देवता अद उ आधिदैवतमित्यत तदुक्तं
भवत्येतद्ध स्मैवैतद्विद्वान् हैहिरण्यदन्बैदो न तस्येशे यो मह्यं न दद्यु ॥२७॥

रिति प्रहितां वा अहमध्यात्मं संयोगं निविष्टं वेदेति तद्ध तदनीशाना नि दैवो
अस्मै भूतानि बलिं हरन्ति य एवं वेद तत्सत्यं सदिति प्राणस्तीत्यन्नं यमि
त२ त्यसावादित्यस्तदेतत्त्रिवृत्त्रिवृदिव वै चक्षुः शुक्लं कृष्णं कनीनिकेति स
यद्धि ह वा अपि मृषा वदति सत्यं हैवास्योदितं भवति य एवमेतत्सत्य
स्य सत्यत्वं वेद ॥५॥२७॥ तस्य वाक्तन्तिर्नामानि दामानि तदस्येदं वाचा
तन्त्या नामभिर्दामभिः सर्वं सितं सर्वं हीदं नामानीति सर्वं वाचाभिवदति
वहन्ति ह वा एनं तन्त्या सम्बद्धं य एवं वेद तस्योष्णिग्लोमानि त्वग्गायत्री

आरण०॥
॥२८॥

त्रिष्टुम्मांसमनुष्टुप्स्नावान्यस्थिजगतीपंक्तिर्मज्जाप्राणोबृहतीसच्छं
दोभिश्छन्नोयच्छंदोभिश्छन्नस्तस्माच्छंदांसीत्याचक्षतेछादयंतिहवा
एनंछंदांसिपापात्कर्मणोयस्यांकस्यांचिद्दिशिकामयतेयएवमेत
च्छंदसांछंदस्त्वंवेदतदुक्तमृषिणापश्यंगोपामित्येषवैगोपाएषही
दंसर्वंगोपायत्यनिपद्यमानमितिनह्येषकदाचनसंविशत्याचप
राचपथिभिश्चरंतमित्याचह्येषपराचपथिभिश्चरतिससध्रीचीः
सविषूचीर्वसानइतिसध्रीचीश्चह्येषविषूचीश्चवस्तइमाएवदिशो ॥२८॥

आवरीवर्त्तिभुवनेष्वंतरित्येषह्यंतर्भुवनेष्वावरीवर्त्यथोआवृतासोव
तासोनकर्हिचिदितिसर्वंहीदंप्राणेनावृतंसोयमाकाशःप्राणेनबृहत्या
विष्टब्धस्तद्यथायमाकाशःप्राणेनबृहत्याविष्टब्धएवंसर्वाणिभूतान्या
पिपीलिकाभ्यःप्राणेनबृहत्याविष्टब्धानीत्येवंविद्यात् ॥६॥२८॥ अथा
तोविभूतयोस्यपुरुषस्यतस्यवाचास्सृष्टेपृथिवीचाग्निश्चास्यामोषध
योजायंतेग्निरेनास्वदयतीदमाहरेतदमाहरेत्येवमेतौवाचंपितरंपरि
चरतःपृथिवीचाग्निश्चयावदनुपृथिवीयावदन्वग्निस्तावानस्यलोको

Indira Gandhi National Centre for the Arts

॥आरण्य०॥ भवतिं नास्य तावल्लोको जीर्यते यावदेतयोर्न जीर्यते पृथिव्याश्चाग्नेश्चैव
॥२९॥ एवमेतां वाचो विभूतिं वेद प्राणेन सृष्टावंतरिक्षं च वायुश्चांतरिक्षं वा अ
नुचरंत्यंतरिक्षमनु शृण्वंति वायुरस्मै पुण्यं गंधमावहत्येवमेतौ प्राणं
पितरं परिचरतोंऽतरिक्षं च वायुश्च यावदन्वंतरिक्षं यावदनु वायुस्तावा
नस्य लोको भवतिं नास्य तावल्लोको जीर्यते यावदेतयोर्न जीर्यतेंतरिक्ष
स्य च वायोश्चैव य एवमेतां प्राणस्य विभूतिं वेद चक्षुषा सृष्टौ द्यौश्चादित्य
श्च द्यौर्हास्मै वृष्टिमन्नाद्यं संप्रयच्छत्यादित्योस्य ज्योतिः प्रकाशं करोत्येव ॥२९॥

मेतौ चक्षुः पितरं परिचरतो द्यौश्चादित्यश्च यावदनु द्यौ यावदन्वादित्यं
स्तावानस्य लोको भवतिं नास्य तावल्लोको जीर्यते यावदेतयोर्न जीर्यतें दि
वश्चादित्यस्य चैव य एवमेतां चक्षुषो विभूतिं वेद श्रोत्रेण सृष्टा दिशश्च चंद्र
माश्च दिग्भ्यो हैनमायंतीं दिग्भ्यो विशृणोति चंद्रमा अस्मै पूर्वपक्षाप
रपक्षान्विचिनोति पुण्याय कर्मण एवमेते श्रोत्रं पितरं परिचरंति दिशश्च
चंद्रमाश्च यावदनु दिशो यावदनु चंद्रमास्तावानस्य लोको भवतिं नास्य ता
वल्लोको जीर्यते यावदेतेषां न जीर्यतें दिशां च चंद्रमसश्चैव य एवमेतां श्रो

॥आरण्य॥ त्रस्य विभूतिं वेद मनसा सृष्टा आपश्च वरुणश्चापो हास्मै श्रद्धां संनमं
॥३०॥ ते पुण्याय कर्मणे वरुणोस्य प्रजां धर्मेण दाधारैवमेतं मनः पितरं परिच
रं त्यापश्च वरुणश्च यावदन्वापो यावदनु वरुणस्तावानस्य लोको भव
ति नास्य तावल्लोको जीर्यते यावदेतेषां न जीर्यते पांच वरुणस्य च य ए
वमेतां मनसो विभूतिं वेद ॥ १ ॥ २७ ॥ आपा३ः इत्याप इति तदिदमाप एवे
दं वै मूलमदस्तूलमयं पिता ते पुत्रो यत्र ह क्व च पुत्रस्य तत्पितुर्यत्र वा पि
तुस्तद्वा पुत्रस्येत्येतत्तदुक्तं भवतीत्येतद्ध स्मैवैतद्विद्वानाह महिदास ऐत ॥३०॥

रेय आह मो देवेभ्यो वेद ओ मद्देवान्वेदे ताः प्रदाना ह्येतदतः संभूता इति स
एष गिरिश्चक्षुः श्रोत्रं मनो वाक् प्राणस्ते ब्रह्मगिरिरित्याचक्षते गिरति ह
वै द्विषन्तं पाप्मानं भ्रातृव्यं परास्य द्विषन्पाप्मा भ्रातृव्यो भवति य एवं वेद
स एषोऽसुः स एष प्राणः स एष भूतिश्चाभूतिश्च तं भूतिरिति देवा उपासांच
क्रिरे ते बभूवुस्तस्माद्धाप्येतर्हि सुप्तो भू भूरित्येव प्रश्वसित्यभूतिरित्य
सुरास्ते ह पराबभूवुर्भवत्यात्मना परास्य द्विषन्पाप्मा भ्रातृव्यो भवति य ए
वं वेद स एष भस्तु श्रेवाम तेच्चं तदुक्तमृषिणा पाद्भः प्राङ्ङिति स्वधया गृभीत

Indira Gandhi National
Centre for the Arts

॥आरण्य०॥ ॥३१॥

ईत्यपानेन ह्ययं यतः प्राणो न पराङ् भवत्यमर्त्यो मर्त्येना सयोनिरित्येतेन
हीदं सर्वं सयोनि मर्त्यानि हीमानि शरीराण्यमृतैषा देवता ताः श्श्वं
ताविषूचीना वियंतान्यन्यं चिक्युर्न निचिक्युरन्यमिति निचिन्वंति हैवे
मानि शरीराण्यमृतैवैषा देवताऽमृतो ह वा अमुष्मिंल्लोके संभवत्यमृ
तः सर्वेभ्यो भूतेभ्यो दद्दृशे य एवं वेद य एवं वेद ॥ ८ ॥ ३० ॥ इति द्वितीयार
ण्यके प्रथमोऽध्यायः ॥ रामः ॐ ॥ एष इमं लोकमभ्यार्चत्पुरुषरूपेणय
एष तपति प्राणो वाव तदभ्यार्चत्प्राणो ह्येष य एष तपति तं शतं वर्षाण्य ॥३१॥

भ्यार्चत्तस्माच्छतं वर्षाणि पुरुषायुषो भवंति तं यच्छतं वर्षाण्यभ्यार्चत्तस्मा
च्छतर्चिनस्तस्माच्छतर्चिन इत्याचक्षत एतमेव संतं स इदं सर्वं मध्यतो द
धे यदिदं किंच स यदिदं सर्वं मध्यतो दधे यदिदं किंचं तस्मान्माध्यमास्तस्मा
संर्ते ४ न्माध्यमा इत्याचक्षत एतमेव प्राणो वै गृत्सोऽपानो मदः स यत्प्राणो गृत्सो
ऽपानो मदस्तस्माद्गृत्समदस्तस्माद्गृत्समद इत्याचक्षत एतमेव संतं तस्ये
दं विश्वं मित्रमासीद्यदिदं किंचन द्यदस्येदं विश्वं मित्रमासीद्यदिदं किंचि
तस्माद्विश्वामित्रस्तस्माद्विश्वामित्र इत्याचक्षत एतमेव संतं तं देवा अब्रु

Indira Gandhi National Centre for the Arts

आरण्य० ॥
॥ ३२ ॥

वन्नयंवैनःसर्वेषांवामइतितेयद्देवाअब्रुवन्नयंवैनःसर्वेषांवामइतितस्मा
द्वामदेवस्तस्माद्वामदेवइत्याचक्षतेएतमेवसंतंसइदंसर्वंपाप्मनोत्रायतय स२
दिदंकिंचसयदिदंसर्वंपाप्मनोत्रायतयदिदंकिंचतस्मादत्रयस्तस्मादत्रय
इत्याचक्षतएतमेवसंतं॥१॥ ॥३१॥ एषउएवबिभ्रद्वाजःप्रजावैवाजस्ता
एषबिभर्त्ति तस्माद्भरद्वाजइत्याचक्षतएतमेवसंतंतेदेवाअब्रुवन्नयं
यद्बिभर्त्तिं
वैनःसर्वेषांवसिष्ठइतितेयद्देवाअब्रुवन्नयंवैनःसर्वेषांवसिष्ठइतितस्मा
द्वसिष्ठस्तस्माद्वसिष्ठइत्याचक्षतएतमेवसंतंसइदंसर्वमभिप्रागाद्यदि ॥ ३२ ॥

× स्तस्माद्भरद्वाजऽ

दंकिंचसयदिदंसर्वमभिप्रागाद्यदिदंकिंचतस्मात्प्रगाथास्तस्मात्प्रगाथा
इत्याचक्षतएतमेवसंतंसइदंसर्वमभ्यपवयतयदिदंकिंचसयदिदं
सर्वमभ्यपवयतयदिदंकिंचतस्मात्पावमान्यस्तस्मात्पावमान्यइत्या
चक्षतेएतमेवसंतंसोब्रवीद हमिदंसर्वमसानियच्चक्षुद्रंयच्चमहदि
तितेक्षुद्रसू क्ताश्चाभवन्महासूक्ताश्चतस्मात्क्षुद्रसूक्तास्तस्मात्क्ष
क्षुद्रसूक्ताइत्याचक्षतेएतमेवसंतंसूक्तंबतनोवोचतेतितत्सूक्तमभ
वत्तस्मात्सूक्तंतस्मात्सूक्तमित्याचक्षतेएतमेवसंतमेषवागृगेष

आरण्य० ॥३३॥

ह्येभ्यः सर्वेभ्यो भूतेभ्योर्चत सयदेभ्यः सर्वेभ्यो भूतेभ्योर्चत तस्मादृकृत
दृस्मागित्याचक्षत एतमेव संतमेष वा अर्धर्च एष ह्ये भ्यः सर्वेभ्योर्धे
भ्योर्चत सयदेभ्यः सर्वेभ्योर्धेभ्योर्चत तस्मादर्द्धर्चस्तस्मादर्द्धर्च इत्याचक्षते
एतमेव संतमेष वै पदमेष हीमानि सर्वाणि भूतानि पादि सयदिमानि स
र्वाणि भूतानि पादि तस्मात्पदं तस्मात्पदमित्याचक्षते एतमेव संतमेष वा
अक्षरमेष ह्येभ्यः सर्वेभ्यो भूतेभ्यः क्षरति न चैनमति क्षरति सयदेभ्यः सर्वे
भ्यो भूतेभ्यः क्षरति न चैनमति क्षरति तस्मादक्षरं तस्मादक्षरमित्याचक्षते ॥३३॥

एतमेव संतं ता वा एताः सर्वा ऋचः सर्वे वेदाः सर्वे घोषा एकैव व्याहृतिः प्रा
ण एव प्राण ऋच इत्येव विद्यात् ॥२॥१०॥ ३२॥ विश्वामित्रं ह्येतदहः शंसिष्यं
तमिंद्र उपनिषससाद स हान्नमित्यभिव्याहृत्य बृहती सहस्रं शशंस तेनें
द्रस्य प्रियं धामोपेयाय तमिंद्र उवाच ऋषे प्रियं वै मे धामोपागाः स वा ऋषे
द्वितीयं शंसेति स हान्नमित्येवाभिव्याहृत्य बृहती सहस्रं शशंस तेनेंद्रस्य
प्रियं धामोपेयाय तमिंद्र उवाच ऋषे प्रियं वै मे धामोपागाः स वा ऋषे तृ
तीयं शंसेति स हान्नमित्येवाभिव्याहृत्य बृहती सहस्रं शशंस तेनेंद्रस्य

Indira Gandhi National Centre for the Arts

आरण्य०॥
॥३४॥

प्रियंधामोपेयायंतमिंद्रउवाचंऋषेप्रियंवैमेधामोपोगांवरंतेददामीति
सहोवाचंत्वामेवजानीयामितितमिंद्रउवाचंप्राणोवाअहमस्म्यृषेप्राणो
स्त्वंप्राणःसर्वाणिभूतानिप्राणोह्येषयएषतपतिसएतेनरूपेणसर्वा
दिशोविष्टोस्मितस्यमेन्नंमित्रंदक्षिणंतद्वैश्वामित्रमेषतपन्नेवास्मीति
होवाचं॥३॥११॥३३॥तद्वाइदंबृहतीसहस्रंसंपन्नंतस्ययानिव्यंजना
पो नितच्छरीरंयोघोषःसआत्मायऊष्माणःसप्राणएतद्धस्मवैतद्विद्वान्वसि
ष्ठोवसिष्ठोबभूवततएतन्नामधेयंलेभेएतदुहैवेंद्रोविश्वामित्रायप्रोवा ॥२४॥

चैनदुहैवेंद्रोभरद्वाजायप्रोवाचतस्मात्सतेनबंधुनायज्ञेषुहूयतेतद्वा
इदंबृहतीसहस्रंसंपन्नंतस्यवाएतस्यबृहतीसहस्रस्यसंपन्नस्यषट्त्रिंश
तमक्षराणांसहस्राणिभवंतितावंतिशतसंवत्सरस्याह्नांसहस्राणिभ
वंतिव्यंजनैरेवरात्रीराप्नुवंतिस्वरैरहानितद्वाइदंबृहतीसहस्रंसंपन्नं
तस्यवाएतस्यबृहतीसहस्रस्यसंपन्नस्यपरस्तात्प्रज्ञामयोदेवतामयो
ब्रह्ममयोमृतमयःसंभूयदेवताअप्येतियएवंवेदतद्योहंसोसौयोसौ
सोहंतदुक्तमृषिणासूर्यआत्माजगतस्तस्थुषश्चेत्येतदुहैवोपेक्षितोपे

Indira Gandhi National
Centre for the Arts

आरण० ॥ क्षेत ॥ ४ ॥ १२ ॥ ३४ ॥ इति द्वितीयारण्यके द्वितीयोध्यायः ॥ राम ॐ मं यो ह
॥ ३५ ॥ वा आत्मानं पंचविधमुक्थं वेद यस्मादिदं सर्वमुत्तिष्ठति स संप्रतिवि
त् पृथिवी वायुराकाशं आपो ज्योतींषीत्येष वा आत्मोक्थं पंचविधमेत
स्माद्धीदं सर्वमुत्तिष्ठत्येतमेवाप्येत्ययनं ह वै समानानां भवति य एवं
वेद तस्मिन्योन्नं चान्नादं च वेदा हास्मिन्नन्नादो जायते भवत्यस्यान्नमा
पश्च पृथिवी चान्नमेतन्मयानि ह्यन्नानि भवंति ज्योतिश्च वायुश्चान्ना
दमेताभ्यां हीदं सर्वमन्नमत्त्यावपनमाकाशं आकाशे हीदं सर्वं समो ॥ ३५ ॥

३१

प्यतं आवपनं ह वै समानानां भवति य एवं वेद तस्मिन्योन्नं चान्नादं च वे
दा हास्मिन्नन्नादो जायते भवत्यस्यान्नमोषधिवनस्पतयोन्नं प्राणभृ
तोन्नादमोषधि वनस्पतीन् हि प्राणभृतो दंति तेषां य उभयतो दंताः पुरुष
स्यानु विधां विहितास्तेन्नादा अन्नमितरे पशवस्तस्मात्त इतरान्पशून
धीव चरं त्यधीव ह्यन्नेन्नादो भवत्यधीव ह समानानां जायते य एवं वेद ॥
१ ॥ १३ ॥ ३५ ॥ तस्य य आत्मानमाविस्तरां वेदाश्नुते हाविर्भूयं ओषधिव
नस्पतयो यच्च किंच प्राणभृत्स आत्मानमाविस्तरां वेदौषधिवनस्प

Indira Gandhi National Centre for the Arts

आरण्य०॥ तेषु हि रसो दृश्यते चित्तं प्राणभृत्सु प्राणभृत्सु त्वेवाविस्तरामात्मा
॥३६॥ तेषु हि रसोपि दृश्यते न चित्तमितरेषु पुरुषे त्वेवाविस्तरामात्मा स हि प्र मा २
ज्ञानेन संपन्नतमो विज्ञातं वदति विज्ञातं पश्यति वेद श्वस्तनं वेद लो
कालोकौ मर्त्येनामृतमीप्सत्येवं संपन्नोथेतरेषां पशूनामशनापिपा
से एवाभि विज्ञानं न विज्ञातं वदंति न विज्ञातं पश्यंति न विदुः श्वस्तनं न
लोकालोकौ त एतावंतो भवंति यथाप्रज्ञं हि संभवाः॥२॥१४॥३६॥स ए
ष पुरुषः समुद्रः सर्वं लोकमति यद्ध किंचाश्नुते त्यैनं मन्यते यद्यंतरि ॥३६॥

क्षं लोकमश्नुते त्यैनं मन्यते यद्यमुं लोकमश्नुवीतात्यैवैनं मन्येत स ए
ष पुरुषः पंचविधस्तस्य यदुष्णं तज्ज्योतिर्यानि खानि स आकाशोथ य
द्धोहितं श्लेष्मा रेतस्ता आपो यच्छरीरं सा पृथिवी यः प्राणः स वा
युः स एष वायुः पंचविधः प्राणोपानो व्यान उदानः समानस्ता एता दे
वताः प्राणापानयोरेव नि विष्टाश्चक्षुः श्रोत्रं मनो वागिति प्राणस्य
ह्यन्वपायमेता अपियंति स एष वाचश्चित्तस्योत्तरोत्तरिक्रमो यद्य
ज्ञः स एष यज्ञः पंचविधोग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यानि

Indira Gandhi National Centre for the Arts

आरण्य० ॥३८॥ पशुः सोमः स एष यज्ञानां संपन्नतमो यत्सोम एतस्मिन्ह्येताः पंच विधा अधि
गम्यंते यस्मात्कृ सवनेभ्यः सैका विधा त्रीणि सवनानि यदूर्ध्वं सा पंचमी ॥
३॥१५॥३७॥ यो ह वै यज्ञे यज्ञं वेदाहन्यहर्देवेषु देवमध्यूळ्हं स संप्रति विदे
षवै यज्ञे यज्ञोऽहन्यहर्देवेषु देवोऽध्यूळ्हो यदेतन्महदुक्थं तदेतत्पंचविधं त्रि
वृत्पंचदशं सप्तदशमेकविंशं पंचविंशमिति स्तोमतो गायत्रं रथंतरं बृह
द्भद्रं राजनमिति सामतो गायत्र्युष्णिग्बृहती त्रिष्टुब्द्विपदेति छंदस्तः शिरो द
क्षिणः पक्ष उत्तरः पक्षः पु  च्छमात्मेत्याख्यानं पंचकृत्वः प्रस्तोति पंचकृ ॥३८॥

त्व उद्गायति पंचकृत्वः प्रतिहरति पंचकृत्व उपद्रवति पंचकृत्वो निधनमुप
यंति तत्स्तोमसहस्रं भवत्येवं ह्येताः पंच विधा अनुशस्यंते यस्मात्कृ चाशी कृ
तिभ्यः सैका विधा तिस्रस्त्वाशीतयो यदूर्ध्वं सा पंचमी तदेतत्सहस्रं तत्स
र्वं तानि दश दशानि वै सर्वमेतावती हि संख्या दश दशानां तत्सहस्रं दश शता
नि तत्सहस्रं तत्सर्वं तानि त्रीणि छंदांसि भवंति त्रेधाविहितं वा इदमन्नमन्नं
पानं खाद्यं तदेतेनाप्नोति ॥४॥१६॥३८॥ तस्मादिदं बृहती सहस्रं संपन्नं
तद्धैतदेके नानाछंदसां सहस्रं प्रतिजानते किमन्यस्य दन्य कुर्यामेति त्रि

Indira Gandhi National
Centre for the Arts

आरण्य० ॥३८॥

ष्टुप्सहस्रमेके जगतीसहस्रमेकेऽनुष्टुप्सहस्रमेके तदुक्तमृषिणानु
ष्टुभमनुचर्चूर्यमाणमिंद्रं निचिक्युः कवयो मनीषेति वाचि वै तदिंद्रं प्राणं
न्यचाय्यंनितितदुक्तंभवति स ह ईश्वरो यशस्वी कल्याणकीर्त्तिर्भवितो
रीश्वरो ह तु पुरायुषः प्रैतोरिति ह स्माहाकृत्स्नो ह्येष आत्मा यद्वागभिहि
प्राणो न ऋते सस्यमानो वाचा नानुभवति बृहतीमभिसंपादयेदेषवैकृत्स्न
आत्मा यद्बृहती सोयमात्मा सर्वतः शरीरैः परिवृतस्तद्यथायमात्मा सर्व
तः शरीरैः परिवृत एवमेव बृहती सर्वतश्छंदोभिः परिवृता मध्यं ह्येषामं ॥३८॥

गानामात्मा मध्यं छंदसां बृहती स ह ईश्वरो यशस्वी कल्याणकीर्त्तिर्भवितो
रीश्वरो ह तु पुरायुषः प्रैतोरिति ह स्माह कृत्स्नो ह्येष आत्मा यद्बृहती तस्मा
द्बृहतीमेवाभिसंपादयेत् ॥५॥१७॥३९॥ तस्माद्विदं बृहतीसहस्रे संपन्नं
तस्य वा एतस्य बृहतीसहस्रस्य संपन्नस्यैकादशानुष्टुभां शतानि भवं
ति पंचविंशतिश्चानुष्टुभ आत्तं वै भूयसा कनीयस्तदुक्तमृषिणा वाचम
ष्टापदीमहमित्यष्टौ हि चतुरक्षराणि भवंति नवस्रक्तिमिति बृहती सं
पद्यमाना नवस्रक्तृतस्पृशमिति सत्यं वै वागृचा स्पृष्टेंद्रात्परि तन्वं मम

Indira Gandhi National Centre for the Arts

॥आरण्य०॥
॥३८॥

इतितद्यदेतद्बृहतीसहस्रमनुष्टुप्संपन्नंभवतितस्मात्त्रदेंद्राप्राणांद्दृ
हत्यैवाचमनुष्टुभंतन्वंसंनिर्मिमीतेसवाएषवाचःपरमोविकारोयदे
तन्महदुक्थंतदेतत्पंचविधंमितममितंस्वरःसत्यानृतेइतिऋग्गाथा
कुंब्यातन्मितंयजुर्निगदोवृथावाक्तदमितंसामाथोयःकश्चगेष्णःस गे४
स्वरओमितिसत्यन्नेत्यनृतंतदेतत्पुष्पंफलंवाचोयत्सत्यंसहैश्वरो
यशस्वीकल्याणकीर्त्तिर्भवितोःपुष्पंहिफलंवाचःसत्यंवदत्यथैत
न्मूलंवाचोयदनृतंतद्यथावृक्षआविर्मूलःशुष्यतिसउद्वर्त्ततएवमे ॥३८॥

वानृतंवदन्नाविर्मूलमात्मानंकरोतिसशुष्यतिसउद्वर्त्ततेतस्मादनृ
